**अक्लल** त्रि॰ न ह्वलति चलति ह्वल—अच् न॰त॰ १भल्लातके। २विह्वलभिन्ने त्रि॰।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये बृहदभिधाने अकारादिकशब्दसमूहः समाप्तः।

## आ

**आ** अव्य॰ आप—क्विप् पृ॰ पलोपः। १वाक्ये (वाक्यस्यान्यथात्वद्योतने पूर्व्वमेवममंस्था इदानीमेवमिति प्रतिपादने) २स्मृतौ (आ एवं मन्यसे इति स्मृतस्यान्यथा प्रतिपादने) ३अनुकम्पायाम्। ४समुच्चये, ५अङ्गीकारे, ६ईषदर्थे ७क्रियायोगे, ८सीमायां ९व्याप्तौ च। वाक्यस्मृतिभिन्नेऽस्य ङित्त्वमिच्छन्ति अङितोऽस्य एकाजनिपातत्वात् प्रगृह्यसंज्ञा ङितस्तु न। अतवोक्तम् "मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः। य आकारः स ङित् प्रोक्तः वाक्यस्मरणयोरङित्" तत्र सीमायाम् आ—आत्मबोधात् आत्मबोधात् "लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्"। व्याप्तौ ब्रह्मास्यासकलात्। सकलं व्याप्येत्यर्थः। एतदर्थे विकल्पेन अव्ययीभावः। आत्मबोधम्। आसकलम्। धातुयोगः उपसर्गः। यथा आगच्छत् ग्रामात्। ईषदर्थे आकम्पः आकेकरः। वाक्यञ्च वाक्यार्थद्योतकता। स्मरणं प्रमाणान्तरावावगतस्य नतु शब्दमात्रेणावगतस्येति तयोर्भेदः।

**आकन** पु॰ आ+कन—अच्। ऋषिभेदे कस्य॰ फिञ्। आकनायनिः तद्गणे आनक इति वा पाठः।

**आकम्प** पु॰ आ+ईषदर्थे कपि—घञ्। ईषत्कम्पे।

**आकम्पन** त्रि॰आकम्पते आ+कपि—युच्। १ईषत्कम्पनशीले। २भावे ल्युट्। ईषत्कम्पे न॰। आ+कपि—णिच्—ल्यु। ३ईषच्चालके त्रि॰। ततएव भावे ल्युट्। ४ईषच्चालने न॰।

**आकम्पित** त्रि॰आ+कपि—कर्त्तरि क्त। १ईषत्कम्पिते "अनोकहाकम्पितपुष्पगन्धी" रघुः। भावे क्त। २ईषत्कम्पने न॰। णिच्—कर्म्मणि क्त। ३ईषच्चालिते त्रि॰।

**आकत्य** न॰ न कतः स्वच्छताकारी अकतस्तस्य भावः ष्यञ्। अस्वच्छत्वकारित्वे। "न नञ्पूर्व्वात्तत्पुरुषादित्यादि" पा॰ सूत्रे तस्य पर्य्युदासात् तत्पुरुष एव ष्यञ्। बहुव्रीहौ तु तलादि। अकतता अकतत्वम्।

**आकम्प्र** त्रि॰ आ+कपि—र। ईषत्कम्पशीले।

**आकर** पु॰ आकुर्व्वन्ति संभूय कुर्व्वन्ति व्यवहारमत्र आ+कृ—घः। १समूहे, "शब्दाकरकरग्राममर्थमण्डलमण्डलम्" कविकल्पद्रु॰ "बभूव वज्राकरभूषणायाः रघुः"। २श्रेष्ठे च। आकीर्य्यन्ते धातवोऽत्र कॄ—अप्। ३रत्नाद्युत्पत्तिस्थाने "आकरे पद्मरागाणां जन्म काचमणेः कुतः" हितो॰ "शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने" "आयव्ययौ च नियतावाकारान् कोषमेव च" "सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" मनुः। "दिलीपसूनुर्मणिराकरोद्भवः" रघुः। ४स्थानमात्रे च कमलाकरः पद्माकरइत्यादि। "हरिदश्वः कमलाकरानिव" रघुः "शैलेन्द्रोहिमवान्नाम धातूनामाकरो महान्" रामा॰। आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदां सहवासः" नैष॰।

**आकरिक** त्रि॰ आकरे नियुक्तः ठञ्। स्वर्णाद्युत्पत्तिस्थानेषु राज्ञा नियुक्ते तत्र हि नियुक्तस्य लोभाधिक्येन पापसम्भवात् तत्राधिकारस्य मनुना उपपातकमध्ये परिगणना कृता। "सर्व्वाकरेष्वधीकार इति"।

**आकरिन्** त्रि॰ आकरः उत्पत्तिस्थानं प्राशस्त्येनास्त्यस्य इनि स्त्रियां ङीप्। "प्रशस्ताकरजाते। "दधतमाकरिभिः करिभिः क्षतैः" किरा॰।

**आकर्ण** अव्य॰ कर्णपर्य्यन्तम् अव्य॰। कर्णपर्य्यन्ते "आकर्णमुल्लसितमस्य विकाशिकाशम्" माघः।

**आकर्णन** न॰ आ+कर्ण—ल्युट्। श्रवणे "मुदा तदाकर्णन तत्पराभूत्" नैष॰।

**आकर्ष** पु॰ आकृष्यते विषयान्तरतोऽनेन आ+कृष—घञ्। १पाशके, २शारिफलके, ३द्यूते, ४इन्द्रिये धन्विनो ५धनुरभ्यासे च। भावे घञ्। ६आकर्षणे। आधारे घञ्। ७निकषे उपले। खलादिगतं धान्यमाकृष्यतेऽनेन करणे घञ्। अङ्कुशाकारे (आकुँड़ा) इति ख्याते ८काष्ठभेदे। "आकर्षः श्वेव आकर्षश्च" सि॰कौ॰। आकर्षति कर्त्तरि अच्। ९आकर्षके त्रि॰। मध्विल्याकर्षैः कुशैः" कात्या॰ १२,२,२०। मध्वाकर्षैः कुशैः" कर्क॰ "आकर्षस्तेऽवाक्फलः सुप्रणीतोहृदि प्रौढोमन्त्रपदः समाधिः" भा॰ स॰ ६अ॰ आकर्षकः हृदयाकर्षकः समाधिः चिन्तनम् अवाक्फलः नीचफलः। आकर्षे (षे) ण चरति ठक् आकर्षिकः। आकर्षणचारिणि त्रि॰ स्त्रियां ङीष्।